SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# माघकाव्यस्य काव्यदोषसमीक्षणम्
# Māghakāvyasya kāvyadoṣasamīkṣaṇam

**Dr. Suman Banerjee**
Guest Faculty, Dept. of Sāhitya
Sanskrit College & University
College Street, West Bengal, India
Email: sumanbanerjee7797@gmail.com

**Abstract:** संस्कृतसाहित्ये बृहत्त्रय्या अन्यतमं काव्यं *शिशुपालवधं* माघस्य एका अमरा कृतिः। अलङ्कारशास्त्रदृष्ट्येदं महाकाव्यपर्यायभुक्तम्। काव्यमिदं युगे युगे सहृदयानां चित्ते सन्तोषं जनयति। अमितकाव्यगुणमण्डितस्यास्य काव्यस्य दोषसमीक्षा शोधपत्रेऽस्मिन् समुपस्थापितास्माभिः। महाकाव्येऽस्मिन् पद-पदांश-वाक्यार्थ-रसगताः सर्वे दोषाः समुपलभ्यन्ते। यथा पदगतो दुःश्रवत्वादिदोषः, पदांशगतो नेयार्थत्वादिदोषः, वाक्यगतो पतत्प्रकर्षत्वादिदोषः, अर्थगतः अपुष्टत्वादिदोषः, तथा रसस्य स्वशब्दोक्तिदोषः च प्रभृतयः प्राप्ता अस्माभिः। समीक्षायां तत्र वाक्यगता दोषा हि सर्वाधिकतया समुपलब्धाः। तेषां पद-वाक्यादिगतानां सर्वेषां दोषाणां विवेको यथामति यथोपपत्ति ललितभारत्या अस्मिन् लघुशोधपत्रे समुपस्थापिताः।

**Keywords:** रसः, दोषः, मुख्यार्थः, प्रतिप्रसवः, अनौचित्यम्, वाक्यदोषः, अलङ्कारशास्त्रम् ।

काव्यरसास्वादनसमये यदि सहृदयहृदये उद्वेगः कोऽपि जायते, तर्हि रसास्वादने नितरां विलम्बो भवति। अतः सहृदयसामाजिकाः सम्यग्भावेन रसास्वादनं कर्तुं न शक्नुवन्ति। दोषो हि अयमेव इति सामान्यतया वक्तुं युज्यते। दोषस्य सामान्यलक्षणं *काव्यालङ्कारकाव्यादर्शा*दिषु चिरन्तनालङ्कारशास्त्रेषु आलङ्कारिका न चक्रुः। अष्टमशतकीयालङ्कारिकस्य वामनस्य *काव्यालङ्कारसूत्रे* गुणवैपरीत्यं हि दोष इत्यभिप्रायेण दोषस्वरूपं सूत्रितमस्ति।[1] दोषः सभ्यानाम् उद्वेगजनक इति अभिप्रायं मनसि निधाय पुराणकारा *अग्निपुराणे* दोषस्वरूपं प्रकटयामासुः।[2] किन्तु परवर्तिनि समये नवमशतकीयालङ्कारिकः श्रीमदानन्दवर्धनो काव्ये रसस्यैवात्मत्वं[3] प्रतिपादयन् दोषतत्त्वं पर्यालोचयत्। तदभिप्रायानुसारेण रस एव काव्ये मुखभूतः।[4] तस्य मुख्यभूतस्य रसस्य केनचित् प्रकारेण यदि कोऽप्यपकर्षो जायते तर्हि तद्दोषाय भवतीति। यद्यपि रसस्य किमपि सामान्यलक्षणं तदीये *ध्वन्यालोके* स न प्रास्तौत, तथापि रसविभङ्गे अनौचित्यस्य हेतुभूततां प्रतिपाद्य रसपरिपोषणानुकूलौचित्यस्य ग्रहणाय आदिशत्।[5] ध्वनिकारोत्तरकाले प्रायेण सर्वैः रसध्वनितत्त्वानुसारिभिः आलङ्कारिकैः ध्वनिकारप्रदर्शिततत्त्वमार्गमनुसरद्भिः दोषतत्त्वस्य वैशद्यं सम्पादितम्। मम्मटाचार्यः स्वीये *काव्यप्रकाशे* मुख्यभूतरसस्यापकर्षसाधकं दोषं चचक्षे।[6]

पीयूषवर्षो जयदेवः *चन्द्रालोके* रमणीयताविनाशकौ शब्दार्थौ एव दोषत्वेन अभिहितवान्।[7] *काव्यानुशासन*[8]-*प्रतापरुद्रीय*[9]योः अलङ्कारग्रन्थयोः अपि रसापकर्षहेतुत्वे दोषत्वमिति विशदीकृतवन्तौ हेमचन्द्र-विद्यानाथौ। चतुर्दशशतकीयो विद्वान् श्रीमद्विश्वनाथो मम्मटाद्याचार्यवृद्धानां चरणलाञ्छनमनुसृत्य रसापकर्षकमेव दोषं चचक्षे।[10]

**दोषवर्गीकरणम्**

दोषाणां वर्गीकरणे आलङ्कारिकवर्गा यतन्ते एव। *नाट्यशास्त्रे, काव्यालङ्कारे, काव्यादर्शे* च ग्रन्थकारैः दोषाणां वर्गीकरणे ग्रन्थकारैः तादृशो यत्नो न विहितश्चेत् वामनीये *काव्यालङ्कारसूत्रे* पद-पदार्थ-वाक्य-वाक्यार्थगतत्वेन दोषाणां चतुर्धा वर्गीकरणम् अस्मल्लोचनपथमवतरति। रुद्रटस्य *काव्यालङ्कारे* पदम्, वाक्यम्, अर्थः चेति क्रमेण दोषा आलोचिताः। *ध्वन्यालोके* ध्वनिकारेण दोषाः सुस्पष्टं वर्गीकृता न चेत् द्वितीयोद्योते नित्यानित्यदोषो विमृष्टोऽस्ति।[11] उद्योतान्तरे विशेषतः तृतीये उद्योते व्युत्पत्त्यव्युत्पत्तिकृतदोषस्य[12], रसदोषविरोधिविभावादिग्रहणस्य[13] च विवेकोऽस्माकं लोचनपथमवरति। भोजदेवस्य *सरस्वतीकण्ठाभरणे* दोषस्य पद-वाक्य-वाक्यार्थगतभेदो दृश्यते।[14] *व्यक्तिविवेके* दोषस्य शब्दार्थगतभेदोऽस्ति।[15] *काव्यप्रकाशे* पद-पदांश-वाक्यार्थ-रसभेदेन दोषः पञ्चधा वर्गीकृतो मम्मटेन।[16] दोषवर्गीकरणे *काव्यानुशासने* हेमचन्द्रः प्रायेण मम्मटाचार्यम् अनुसृतवान्। *वाग्भटालङ्कारे* दोषः पद-वाक्य-अर्थगतत्वेन त्रिधा विभाजितो वाग्भटेन।[17] जयदेवस्य *चन्द्रालोके* शब्दार्थगतत्वेन दोषस्य द्वैविध्यं परिलोक्यते।[18] *प्रतापरुद्रीये* पद-वाक्य-अर्थ-रसगतत्वेन दोषः चतुर्धा विश्लेषितो विद्यानाथवर्येण।[19] *साहित्यदर्पणे* आचार्यश्रिया विश्वनाथेन पद-पदांश-वाक्य-अर्थ-रसगतत्वेन[20] पञ्चधा वर्गीकृत्य दोषविमर्शो वैशद्येन समुपस्थापितो दोषतत्त्वजिज्ञासूनां परितृप्त्यर्थम्।

**शिशुपालवधमहाकाव्ये काव्यदोषसमीक्षणम्**

संस्कृतसाहित्ये महाकाव्यत्वेन महाकविना माघेन प्रणीतं *शिशुपालवधं* सहृदयविदुषां समाजे समादृतमस्ति। इदं काव्यं बृहत्रय्याम् अन्यतमम्। अत्र विंशतिः सर्गाः सन्ति। प्रायेण षड्शतोत्तसहस्रं श्लोका अत्र प्राप्यन्ते। काव्यसौन्दर्यमण्डितेनानेन महाकाव्येन माघः सुप्रसिद्धिं लेभे। किन्तु, एतदपि सत्यं यत् *साहित्यदर्पणा*दिषु अलङ्कारशास्त्रेषु *शिशुपालवध*महाकाव्यस्य केषुचित् पद्येषु काव्यदोषमदर्शयन् आलङ्कारिकाः। वयमपि महतोऽस्य काव्यस्य पद्येषु काव्यदोषं समीक्षितुं यतामहे। अस्मदीये अस्यां समीक्षाप्रक्रियायां मुख्यतया *साहित्यदर्पणः* समनुसृतो भवेत्। दोषविषये तदीयां विचारधारां पुरस्कृत्य मनसि निधाय च वयं शोधसाधने कृतयत्ना भवामः। *साहित्यदर्पणे* समुपन्यस्ता वर्गीकरणप्रक्रियाः यथावदनुसृत्य वयं समीक्षामहे।

**पददोषः–** *साहित्यदर्पणे* प्रायेण त्रयोदश दोषाः पददोषे गण्यते।[21] तन्मध्ये केचित् शिशुपालवधे प्राप्ता अस्माभिः।

**दुःश्रवत्वम्**[22]– कार्कश्यं सभ्यानां सततमेव उद्वेगं जनयति। एवं परुषवर्णतया पद्यश्रवणमात्रेण यत्र सहृदयानां क्लेशो जायते, तत्रैव भवति दुःश्रवत्वं दोषः। तल्लक्षितं विश्वनाथेन

*साहित्यदर्पणे* – 'परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम्'[23] इति। विशेषतो वीर-रौद्र-बीभत्सरसान् विना रसान्तरे दुःश्रवत्वस्य मुख्यापकर्षत्वात् दोषत्वमेव। अतोऽनित्योऽयं दोषः। दोषोऽयं पदे पदांशे च सम्भवतीति *काव्यप्रकाशादौ*[24] अलङ्कारशास्त्रे विचार्य्यते। *शिशुपालवधे* कानिचित् पद्यानि दुःश्रवत्वदुष्टानीति प्राप्यते। दिङ्मात्रमुदाह्रियते *शिशुपालवधे*–

'विलुलितकमलौघः कीर्णवल्लीवितानः
प्रतिवनमवधूताशेषशाखिप्रसूनः।
क्वचिदयमनवस्थः स्थास्नुतामेति वायु-
वधूकुसुमविमर्दोद्गन्धिवेश्मान्तरेषु॥'[25] इति।

*शिशुपालवधस्य* एकादशसर्गस्थमिदं पद्यम्। अत्र स्निग्धप्रभातवायोः प्रवाहो वर्ण्यते कविना। पद्यस्यास्य तृतीये चरणे परुषवर्णतया श्रोतृणाम् उद्वेगो जायते। अतोऽत्र दुःश्रवत्वदोषः। पद्येऽत्र वीररसादीनाम् असत्त्वात् परुषवर्णप्रयोगो दोषायैव।

एवमन्यत्र दुःश्रवत्वं यथा –

'मदमदनविकासस्पष्टधार्ष्टोदयानां
रतिकलहविकीर्णैर्भूषणैरर्चितेषु।
विदधति न गृहेषत्फुल्लपुष्पोपहारं
विफलविनययत्नाः कामिनीनां वयस्याः॥'[26] इति।

एकादशसर्गस्थेऽस्मिन् पद्ये प्रथमे चरणे 'धार्ष्टो' इति पदस्य प्रयोगेन सहृदयानां श्रुतिकार्कश्यं जायते। अतो दुःश्रवत्वं दोषोऽत्र।

**अश्लीलत्वम्**[27]– श्रियं काव्यशोभां लाति ददातीति श्लीलः। न श्लीलः अश्लीलः। तस्य भावः अश्लीलता। व्रीडा-जुगुप्सामङ्गलव्यञ्जकशब्दत्वमेवाश्लीलत्वम्। यस्मिन् पद्ये प्रयुक्तं पदं व्रीडाया जुगुप्साया अमङ्गलस्य वा व्यञ्जकं भवति तत् एव पदम् अश्लीलम् इति भावः। इदम् अश्लीलत्वं व्रीडा-जुगुप्सा-अमङ्गलव्यञ्जकं त्रिविधं भवति।[28] *शिशुपालवध*महाकाव्ये प्रथमप्रकारः अर्थात् व्रीडाव्यञ्जकम् अश्लीलपदं प्राप्तमस्माभिः –

'इत्थमत्र विततक्रमे क्रतौ वीक्ष्य धर्ममथ धर्मजन्मना।
अर्घदानमनु चोदितो वचः सभ्यमभ्यधित शन्तनोः सुतः॥'[29] इति।

अस्मिन् पद्ये 'चोदित' इति पदं सभ्यानां व्रीडां जनयति। व्रीडाव्यञ्जकत्वात् अत्र अश्लीलत्वं दोषः। वस्तुतः 'चोदित' इति पदस्य श्रवणानन्तरं सहृदयसभ्यानाम् असभ्यस्मृतेः[30] उद्रेको भवति।

**अवाचकत्वम्**[31]– अवाचकत्वम् अनभिधायकत्वमिति। इदं पददोषे परिगण्यते। सर्वथैव विवक्षितार्थानवबोधकत्वम् अवचाकत्वमिति। यत्र कोऽपि शब्दः विवक्षितार्थम् अवबोधयितुं न समर्थो भवति तत्र अवाचकत्वं दोषो भवतीति। विवक्षितधर्मयुक्तस्य विवक्षितधर्मिणो न वाचकत्वं हि अवाचकत्वम्। एतादृशशब्दस्य प्रयोगात् अस्मिन् दोषे तात्पर्यविषयीभूतवस्तुधर्मप्रकारिका

बुद्धिः न जायते। तदुच्यते अलङ्कारतत्त्वविद्भिः –

'तात्पर्यविषयीभूतवस्तुधर्मप्रकारिका।
यतो न जायते बुद्धिः पदं तत्स्यादवाचकम्॥'[32] इति।

*शिशुपालवधस्य* –

'महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमोऽभिरामताम्॥'[33] इति।

अस्मिन् पद्ये कविना श्रीकृष्णसविधे उपविशतो नारदमुनेः सौन्दर्यं वर्ण्यते। अत्र 'कंसकृषः (ष)' पदं 'कृष्ण' इत्यर्थस्य अवबोधनाय कविना प्रयुक्तम्। किन्तु, तदर्थावबोधनाय 'कंसकृषः(ष)' पदं शक्तं न भवति। अतः कृष्णार्थे तत् पदम् अवाचकम्। अतः अवाचकत्वं दोषोऽत्रास्माभिः समीक्षितः। अत्र पद्ये 'कंसकृषः(ष)' इति पदेन कृष्णरूपाविवक्षितार्थस्यानवबोधने सहृदयानां रसप्रतीतौ विलम्बो जायते। अतः दोषत्वमिति भावः।

*शिशुपालवधस्या*नेकत्र अवाचकत्वदोषप्रसङ्गः अस्मदीयां लचनपदवीमारोहति।[34]

**अविमृष्टविधेयांशता**[35]— अविमृष्टः प्राधान्येन अनिर्दिष्टो विधेयांशो यत्र तत्त्वम्। एतल्लक्षयितुमाह विश्वनाथः– 'विधेयस्य विमर्शाभावेन गुणीभूतत्वम् अविमृष्टविधेयांशत्वम्'[36] इति। विधेयांशस्य प्रधानभागस्य विमर्शाभावेन प्रधाननिर्देशनाभावेन गुणीभूतत्वम् अविमृष्टविधेयांशत्वम् इति। पदार्थानां मध्ये विधेयांश उपादेयो भवति। अत उपादेयत्वात् स एव विधेयांशः प्रधानः। एवं प्रधानस्य प्राधान्येन निर्देश एव उचितः। किन्तु यदि तद्विपर्ययो घटते, तर्हि अयं दोषो भवति। क्वचित् समासेन, क्वचिद्वा उद्देश्यविधेयपदयोः पौर्वापर्यविपर्ययेण तद्विपर्ययो भवति।

'गतधृतिरवलम्बितुं वतासूननलमनालपनादहं भवत्याः।
प्रणयिनि यदि न प्रसादबुद्धिर्भव मम मानिनि! जीविते दयालुः॥'[37] इति।

पद्येऽस्मिन् 'अनलम्' इत्यत्र नञर्थस्य प्राधान्यम्। अतः प्रधानत्वेन हि तस्य निर्देशः कर्तव्यः। किन्तु, समासस्य कारणात् गुणीभावोऽत्र। अतोऽप्राधान्येन निर्देशात् अविमृष्टविधेयांशत्वं दोषः।

**पदांशदोषः** —

**दुःश्रवत्वम्** (पदांशगतम्)– पदांशगतो दुःश्रवत्वदोषोऽपि सम्भवतीति साहित्यतत्त्वकोविदानां परामर्शः।[38]

'पीत्वा जलानां निधिनातिगार्ध्या-
द्-वृद्धिं गतेऽप्यात्मनि नैव मान्तीः।
क्षिप्ता इवेन्दोः स रुचोऽधिवेलं
मुक्तावलीराकलयाञ्चकार॥'[39] इति।

अस्मिन् पद्ये प्रथमे चरणे– 'द्यो' इति परुषवर्णतया दुःश्रवत्वं दोषः। एतत् पदांशगतं दुःश्रवत्वम्।

उदाहरणान्तरम्–

'व्रजति विषयमक्ष्णामंशुमाली न यावत्।'[40] इति।

अस्मिन् पद्ये 'अक्ष्णाम्' इत्यत्र पदे 'क्ष्ण' इति पदांशगतं दुःश्रवत्वं दोषः स्फुटः।

**नेयार्थत्वम्**[41] (पदांशगतम्)– नेयार्थत्वं दोषः *साहित्यदर्पणे* पददोषे गण्यते। किन्तु, अस्य पदांशगतत्वमपि तत्र विधीयते विश्वनाथकविराजेन।[42] नेयो न्यायराहित्येन कवेः स्वेच्छया कल्पनीयः अर्थो यस्य तस्य भावः, तत्त्वम् इति नेयार्थत्वम्। नेयार्थत्वं लक्षयितुमाह विश्वनाथः– 'नेयार्थत्वं रूढिप्रयोजनाभावात् अशक्तिकृतं लक्षार्थप्रकाशनम्'[43] इति। शक्तिः प्रतिभा सामर्थ्यम्, व्युत्पत्तिर्वा। न शक्तिः अशक्तिः, तया कृतं। रूढिप्रयोजनयोः अभावात् लक्ष्यार्थप्रकाशनं लक्ष्यः शक्यविरुद्धोऽर्थः तस्य प्रकाशनं प्रकाशकत्वम्। लक्षणा रूढिप्रयोजनमूला भवति। एतद्धेतुद्वयं विना शक्यसम्बन्धमात्रेण अशक्यार्थोपस्थापनमिति। *शिशुपालवधे* पदांशगतं नेयार्थत्वं यथा –

'हरिर्हरिप्रस्थमथ प्रतस्थे॥'[44] इति।

अत्र पद्ये कविः माघः 'इन्द्रप्रस्थम्' इत्यवबोधयितुं 'हरिप्रस्थम्' प्रयुङ्क्ते। किन्तु 'इन्द्रप्रथम्' इति पदस्य एकतरांशोऽपि परिवृत्तिं न सहते। किन्तु, हरिप्रस्थस्य उपादानात् तत्र शब्दपरिवृत्तिः सञ्जायते। अत्र इन्द्रशब्दस्य पर्यायवाचिनो हरि-शब्दस्य प्रयोगः कृतः। किन्तु एतादृशस्य लाक्षणिकप्रयोगस्य रूढि-प्रयोजनादिकं किमपि कारणं नास्ति। अर्थात् अत्र हरिप्रस्थपदोपादानात् तत्र च रूढिप्रयोजनयोरभावेऽपि हरिपदेन अशक्तिकृतस्य इन्द्र-रूपलक्षार्थस्य प्रकाशनात् पदांशगतो नेयार्थत्वदोषः।

अन्यदुदाहरणम् –

'गुरुकोपरुद्धपदमापदसितयवनस्य रौद्रताम्।'[45] इति।

पद्येऽत्र 'असितयवन' इति पदस्य 'असित' पदांशेन 'कालरूपलक्ष्यार्थ'स्य प्रकाशनं भवति। किन्तु एतादृशलाक्षणिकप्रयोगस्य रूढि-प्रयोजनादिकं किमपि कारणं नास्ति। अतः रूढि-प्रयोजयोरभावे कालरूपलक्ष्यार्थप्रकाशनात् पदांशगतो नेयार्थत्वदोषः।

**वाक्यदोषः** – *साहित्यदर्पणे* केवलवाक्यमात्रगता त्रयोविंशतिर्दोषा विधृताः सन्ति।[46] एतेषां मध्ये *शिशुपालवधे* प्रायेण दशसंख्यकाः प्राप्ताः।

**अविमृष्टविधेयांशता** (वाक्यगता)– अविमृष्टविधेयांशतायाः वाक्यगतत्वमपि सम्भवतीति *साहित्यदर्पणे*[47] विधीयते।

'अवतमसभिदायै भास्वताभ्युद्गतेन
प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः।
निरसितुमरिमिच्छोर्य तदीयाश्रयेण
श्रियमधिगतवन्तस्तेऽपि हन्तव्यपक्षे॥'[48] इति।

पद्येनानेन कविः प्रभातकालीनसूर्योदयं वर्णितवान्। अत्र द्वितीयचरणस्य अन्वयः– 'अरिं निरसितुम् इच्छोः हन्तव्यपक्षे ते अपि स्युः, ये तदीयाश्रयेण श्रियमधिगतवन्तः' एवम् कर्तुं युज्यते। वाक्येऽस्मिन्– उद्देश्यभागः, विधेयभागः च स्तः। उद्देश्यवाक्यं तावत्– 'ये त्वदीयाश्रयेण श्रियमधिगतवन्तः' इति। अन्यत्र विधेयवाक्यन्तु– 'अरिं निरसितुम् इच्छोः तेऽपि हन्तव्यपक्षे स्युः' इति। 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेन्' इति न्यायानुसारेण उद्देश्यनिर्देशनमादौ कर्तव्यमस्ति, ततःपरं विधेयनिर्देशनमिति। किन्तु पद्येऽत्र उद्देश्य-विधेययोः पौर्वापर्यविपर्ययात् स न्यासो न रक्षितः। अतएव विधेयभागस्यय विमर्शाभावेन गुणीभूतत्वम्। अतः अविमृष्टविधेयांशत्वं दोषः। उद्देश्यविधेयपौर्वापर्यविपर्ययात् मुख्यार्थस्य प्रतीतिविलम्बात् रसप्रतीतौ विलम्ब इति कृत्वा दोषत्वमेव। अयम् अविमृष्टविधेयांशत्वं दोषो नित्यः।

**पतत्प्रकर्षत्वम्**[49]– पतन् ह्रसन् प्रकर्षः क्रमिकोत्कर्षः तस्य भावः पतत्प्रकर्षत्वमिति। क्रमिकप्रकर्षहीनत्वमेव पतत्प्रकर्षत्वमिति लक्षणम्। यत्र अलङ्कारकृतस्य बन्धकृतस्य वा प्रकर्षस्य उत्तरोत्तरं पातो निकर्षो भवति, तदैव पतत्प्रकर्षनामको वाक्यदोषो भवति। मुख्यतोऽत्र पूर्वापेक्षया उत्तरत्र बन्धस्य शैथिल्यात् अनुप्रासपाताच्च निकर्षो भवति। तदुच्यते अलङ्कारतत्त्वविचक्षणैः–

'पतत्प्रकर्षे बन्धस्य शैथिल्यादुत्तरोत्तरम्।
पूर्वानुसारतो कोऽपि निकर्षो यत्र जायते॥'[50] इति।

*शिशुपालवधस्य* प्रथमे सर्गे एकत्र पतत्प्रकर्षत्वमभिलक्षितमस्माभिः। पद्यं यथा –

'निदाघधामानिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी।
विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत्॥'[51] इति।

स्वर्गतो नारदमुनेरवतरणात् श्रीकृष्णस्यानन्दातिशय्यं श्लोकेनानेन वर्ण्यते कविना माघेन। उक्ते पद्ये प्रथमे चरणे– 'द-ध' वर्णयोः, द्वतीये चरणे– 'म' वर्णस्य, तृतीये– 'श्र' इति युक्तवर्णयोः च क्रमेण वर्णसाम्यरूपोऽनुप्रासो[52] लक्ष्यते। एवं श्लोकस्थचरणत्रितये अनुप्रासानन्तरं चरमे चरणे अनुप्रासाभावेन प्रकर्षपातात् पतत्प्रकर्षत्वमिति दोषः।

**कथितपदता**[53]– कथितं पदं यस्मिन् तत् कथितपदं, तस्य भावः कथितपदत्वमिति। प्रयोजनशून्यत्वे सति समानार्थकसमानुपूर्विकवत्त्वं कथितपदत्वमिति लक्षणं भवितुमर्हति। अर्थात्, यदि प्रयोजनं विना एव समानार्थकं समानाकारं वा किमपि पदं द्विवारं प्रयुज्यते तर्हि तत्र कथितपदता दोषो भवति।

*शिशुपालवधस्य* प्रथमसर्गस्थे पद्यविशेषे दोषोऽयं परिलक्ष्यते। पद्यं यथा–

'कृतः प्रजाक्षेमकृता प्रजासृजा सुपानिक्षेपनिराकुलात्मना।
सदोपयोगेऽपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसम्पदामिव॥' इति।

नारदं मुनिं प्रति श्रीकृष्णस्येदं प्रशंसाव्यञ्जकं व्याक्यमिदम्। पद्येऽत्र समानार्थकं तथा समानानुपूर्वीकं 'प्रजा' इति पदं द्विवारं प्रयुज्यते। अतः कथितपदत्वं दोषः। एतादृशः पदप्रयोगः कवेः अशक्तिं प्रकाशयन् वैरस्यं किमपि आवहतीति मतं विदुषाम्।[54]

अन्यदुदाहरणम्–

'सस्नुः पयः पपुरनेनिजरम्बराणि
जक्षुर्बिसं धृतविकासिबिसप्रसूनाः।
सैन्याः श्रियामनुपभोगनिरर्थकत्व-
दोषप्रवादममृजन्नगनिम्नगानाम्॥'[55] इति।

पार्वत्यनद्यां श्रीकृष्णस्य सैन्यादिकानां स्नानादिकं कविना वर्ण्यतेऽनेन श्लोकेन। पद्येऽत्र 'बिस'-पदस्य द्विवारम् उपादानात् कथितपदता दोषः स्फुटः। एवं *शिशुपालवधे* सर्गान्तरेऽपि केषुचित् पद्येषु[56] कथितपदतादोषो दृश्यते।

**भग्नप्रक्रमता**[57]– भग्नो नष्टो विच्छिन्नो वा प्रक्रमः प्रस्तावः (उपक्रमः) यस्य स भग्नप्रक्रमः, तस्य भावो भग्नप्रक्रमता। वस्तुतो यत्र येन प्रकारेण यत् प्राङ्निर्दिष्टमस्ति, तेन प्रकारेणैव तत् कथनीयम्। तत्प्रकारेणानुक्तौ भङ्ग एव। येन रूपेणोपक्रमस्तेनैवोपसंहारः इति नियमस्य भङ्गो हि भग्नप्रक्रमतेति भावः। भग्नप्रक्रमता प्रकृति-प्रत्यय-सर्वनाम-पर्यायदिविषयत्वादनेकधेति व्यवस्थीयते। यतोऽत्र भिन्नप्रक्रमवत्पदानां प्रयोगो भवति, अतः तत्कारणानुसन्धानेन विलम्बो जायते। तद्विलम्बत्वात् रसप्रतीतौ विलम्ब इति कृत्वास्य दोषता।

*शिशुपालवध*महाकाव्ये प्रकृति-प्रत्यय-लिङ्ग-कालभेद-पर्यायविषयो भग्नप्रक्रमतादोषोऽस्माभिः समीक्षितः। क्रमेण तेषामुदाहरणं सविवेकं प्रस्तूयते।

प्रकृतिविषयः – मूलः शब्दः, धातुः वोच्यते व्याकरणे प्रकृतिः।[58]

'नैतल्लघ्वपि भूयसा वचो वाचातिशय्यते।'[59] इति।

अत्र पद्ये द्वितीयचरणस्य प्रारम्भः 'वचो (वचस्)' शब्देन कृत्वा तच्छब्देनैव उपसंहारः कर्तव्य आसीत्। किन्तु, 'वाचा (वाक्)' इति अभिधानात् प्रकृतिविषयभग्नप्रक्रमता दोषः।

उदाहरणान्तरम् –

'संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः।
सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे॥'[60] इति।

अत्र पद्ये द्वितीयचरणस्य प्रारम्भो 'वाक्य' इत्यनेन कृत्वा तृतीयचरणे 'वाचः (वाक्)' इत्यभिधानात् भग्नप्रक्रमता दोषः।

अपरं च –

'तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता।'[61] इति।

अत्र पद्ये कविना 'तुरग' 'भूभृत्' इत्यादिना प्रक्रम्य क्रमेण 'तुरङ्ग', 'महीभृत्' चेत्यादिपदाभिधानात् प्रकृतिविषयो भग्नप्रक्रमता दोषः।

माघस्य *शिशुपालवधे* सर्गान्तरे अनेकपद्येषु प्रकृतिविषयो भग्नप्रक्रमतादोषः[62] परिलक्ष्यते।

प्रत्ययविषयः –

'उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा।
उपकारापकारी हि लक्ष्यं लक्षणमेतयोः॥'[63] इति।

पद्येऽत्र 'उपकर्त्रा (उप-कृ+तृच्)' इति तृच्-प्रत्ययान्तपदेन प्रक्रम्य 'अपकारी (अप-कृ+णिनि)' णिनि-प्रत्ययान्तपदेनाभिधानात् अत्र प्रत्ययविषयो भग्नप्रक्रमतादोषः।

*शिशुपालवध*महाकाव्यस्यानेकत्रायं दोषः परिलक्ष्यते।[64]

लिङ्गविषयः –

'पुराणि दुर्गाणि निशातमायुधं
बलानि शूराणि घनाश्च कञ्चुकाः।'[65] इति।

अत्र पद्ये 'पुराणि' इत्यादिना नपुंसकलिङ्गेन प्रक्रम्य 'कञ्चुकाः' 'घनाः' चेति पुंलिङ्गप्रयोगात् लिङ्गविषयो भग्नप्रक्रमतादोषः।

अन्यदुदाहरणम् –

'तपेन वर्षाः शरदा हिमागमो
वसन्तलक्ष्म्या शिशिरः समेत्य च।'[66] इति।

अस्मिन् श्लोके 'तपेन' इति पुंलिङ्गतृतीयान्तपदेन प्रक्रम्य 'शरदा' 'वसन्तलक्ष्म्या' चेत्यादिस्त्रीलिङ्गतृतीयान्तपदाभ्याम् अभिधानात् लिङ्गविषयो भग्नप्रक्रमता दोषः। *शिशुपालवध*स्य अन्यसर्गेऽपि अयं लिङ्गविषयभग्नप्रक्रमतादोषो लक्ष्यते।[67]

कालभेदविषयः–

'अभितः सदोऽथ हरिपाण्डवौ रथादमलांशुमण्डलसमुल्लसत्तनू।
अवतरेतुर्नयनन्दनौ नभःशशिभार्गवावुदयपर्वतादिव॥'[68] इति।

उदयपर्वतात् शशिभार्गवयोः तथा रथात् हरिपाण्डवयोः अवतरणे कालभेदः स्पष्टः। अतः कालभेदविषयभग्नप्रक्रमतादोषः।

पर्यायविषयः–

'जितरोषरया महाधियः सपदि क्रोधजितो लघुर्जनः।
विजितेन जितस्य दुर्मतेर्मतिमद्भिः सह का विरोधिता॥'[69] इति।

पद्येऽस्मिन् 'रोषः' इति पदेन प्रारभ्य 'क्रोध' इति पदेन अभिधानात् पर्यायविषयो भग्नप्रक्रमतादोषः। क्रोधः कोपः चोभयोः पर्यायवाचित्वं कोषादौ प्रसिद्धमस्ति।[70]

**अधिकपदता**[71]– अनावश्यकपदत्वम् अनुपयुक्तपदत्वं वा अधिकपदत्वमिति। वाक्ये कदाचित् अनावश्यकं पदं प्रयुज्यते, तत्र अधिकपदतादोषो भवति। एतादृशस्यानवश्यकपदस्य व्यवहारे, अस्य प्रासङ्गिकता अस्ति न वेति सार्थानुसन्धाने विलम्बात् रसप्रतीतौ विलम्बो जायते। अतो दोष एव। किन्तु, अनित्योऽयं दोषः।

'ताः पूर्वं सचकितमागमय्य गाधं कृत्वाथो मृदु पदमन्तराविशन्त्यः।

कामिन्यो मन इव कामिनः सरागैरङ्गैस्तज्जलमनुरञ्जयाम्बभूव॥'[72] इति।

कामिनीनां जलविहारोऽस्मिन् श्लोके वर्ण्यते कविना। द्वितीये चरणे कविना आनन्तर्यबोधनार्थे 'अथ' इत्यव्ययपदं व्यवहृतम्। किन्तु लक्षणीयं यत् – प्रथमचरणस्थेन 'आगमय्य' इत्यनेन पदेन आनन्तर्यबोधो जायते। अतः पुनः तदर्थावगतये अथ-शब्दस्य व्यवहारे पदाधिक्यात् अधिकपदतानामको दोषः।

**न्यूनपदता**[73]– उपादेयवाचकपदहीनवाक्यत्वं न्यूनपदत्वमिति लक्षणं युज्यते। अर्थात्, विवक्षितस्य उपादेयस्य वार्थस्य वाचकं पदं यदि वाक्ये न प्रयुज्यते तर्हि इयं न्यूनपदता सम्भवतीति भावः। यथा *शिशुपालवधे*—

'निषेव्यमाणेन शिवैर्मरुद्भि-
रध्यास्यमाना हरिणा चिराय।
उद्रश्मिरत्नाङ्कुरधाम्नि सिन्धा-
वाह्वास्त मेरावमरावतीं या॥'[74] इति।

द्वारकानगरी सौन्दर्यातिशय्येन अमरावतीतुल्येति अत्र वक्तुमभिलाषः कवेः। श्लोके 'सिन्धौ', 'मरौ' चेति उभयशब्दाभ्यां परमेव क्रमेण– 'स्थिता' 'स्थिताम्' चेति पदद्वयस्याभिधानं विवक्षितमासीत्। अर्थात्, 'सिन्धौ <u>स्थिता</u> या (द्वारका) मेरौ <u>स्थिताम्</u> अमरावतीम् आह्वास्त' इति विवक्षा। किन्तु, तयोः पदयोः असत्त्वात् दोषत्वमेव।

एवं *शिशुपाववधस्य* सर्गान्तरस्थितेषु पद्येषु[75] न्यूनपदता लक्ष्यते।

**अस्थानपदता**– अनुपयुक्तस्थाने वाचकपदप्रयोगत्वम् अस्थानपदत्वम्। अनुपयुक्तस्थाने अस्थाने वा यदि वाचकपदस्य प्रयोगः क्रियते, तर्हि अयम् अस्थानपदतानामको दोषो भवति। वस्तुतः समुचिते स्थान एव पदप्रयोगः काम्यः, तदन्यथा अस्थानपदतादोषो जायते। अस्थाने पदमात्रस्य निवेशो सर्वमेव वाक्यं विवक्षितार्थप्रत्यायने मन्थरं भवतीति कृत्वा वाक्यदोषः। *शिशुपालवधे* अस्योदाहरणं प्राप्यते। तद्यथा–

'तत्पूर्वमंसद्वयसं द्विपाधिपाः क्षणं सहेला परितो जगाहिरे।
सद्यस्ततस्तेरुरनारतस्रुतस्वदानवारिप्रचुरीकृतं पयः॥'[76] इति

उपजातिच्छन्दोमये पद्येऽस्मिन् हस्तिनां यमुनानद्यतिक्रमणं वर्णितं माघेन। पद्ये 'पयः' इति पदस्य व्यवहार आदौ समुचित एव। ततःपरं 'तत्' इति सर्वनाम। यतः तत्-इत्यनेन पय एव अवगम्यते। अतः प्रथमम् 'तत्' इत्यभिधाय तत्परं 'पय' इत्यभिधानात् अस्थानपदता दोषः।

**गर्भितता**[77]– वाक्यस्य वाक्यान्तरे यत्रानुप्रवेशो भवति, तत्रैव भवति गर्भिततानामको दोषः। गर्भितता वाक्यान्तरे वाक्यान्तरानुप्रवेशे भवतीति मतं प्रदर्शयति विश्वनाथाचार्यः।[78] अनुरूपाभिप्रायः *काव्यप्रकाशे*ऽपि दृश्यते।[79] वाक्यान्तरे यदि वाक्यान्तरं प्रविशति, तर्हि अन्वयार्हपादानाम् अनुसन्धाने विलम्बो जायते। अतो रसप्रतीतावपि विलम्ब इति कृत्वा दोषः। अनित्योऽयं दोषः। *शिशुपालवध*महाकाव्ये गर्भितता लक्ष्यते। उदाहरणं यथा—

'आत्मानमेव जलधेः प्रतिबिम्बताङ्ग-
मूर्मौ महत्यभिसुखापतितं निरीक्ष्य।
क्रोधादधावदपभीरभिहन्तुमन्य-
नागाभियुक्त इव युक्तमहो महेभः॥'[80] इति।

अत्र तृतीयचरणस्य प्रथमे– 'अधावत्' इति क्रियापदं चतुर्थचरणस्थेन– 'महेभः' इति पदेनान्वितं सत् वाक्यं सृष्टम्। तस्मिन् वाक्ये 'अहो युक्तम्' इति वाक्यान्तरस्य प्रवेशात् गर्भिततादोष एव।

**समाप्तपुनरात्तता**[81]– समाप्तम् अन्वयबोधजननात् निराकाङ्क्षमपि पुनः विशेषणान्तराकाङ्क्षणा आत्तं गृहीतं यत्र तस्य भावः पुनरात्ततेति। वाक्ये क्रियाकारकयोः समाप्त्या वाक्यं सम्पूर्णं सत् यदि पुनः वाक्यान्वयिपदाभिधानं क्रियते, तर्हि समाप्तपुनरात्तता दोषो भवतीति सरलार्थः। *शिशुपालवध*स्यानेकत्र पद्येषु इयं समाप्तपुनरात्तता लक्ष्यते। दिङ्मात्रं तत्रोदाह्रियते –

'बृहत्तुल्यैरप्यतुलैर्वितानमालापिनद्धैरपि चावितानैः।
रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः॥'[82] इति।

पद्येऽस्मिन् चतुर्थचरणे 'गृहैः' इत्यत्र वाक्यस्य आकाङ्क्षा समाप्यते। किन्तु, पुनः 'विशालैः' 'भूरिशालैः' इति गृहस्य विशेषणद्वयेन पुनरुपादानात् समाप्तपुनरात्तता दोषः।

*शिशुपालवध*स्य अनेकत्र पद्येषु[83] इयं समाप्तपुनरात्तता परिलक्ष्यते।

**अक्रमता**[84]– अविद्यमानः क्रमो यस्मिन् वाक्ये सोऽक्रमः, तस्य भावः अक्रमता। विशेषतः यत्पदस्यान्तरं यत्पदस्योपादानमुचितं वर्तते, ततोऽन्यत् यत्रोपादीयते तदेवाक्रमिति वक्तुं युज्यते। अक्रमस्थपदस्य अनुसन्धानविलम्बात् रसप्रतीतिविलम्ब इति भावः। *शिशुपालवधे* अक्रमतादोषयुक्तं पद्यं यथा–

'समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयूरमणीयताम्॥'[85] इति।

वाक्येऽस्मिन् 'बलाबम्' इति पदात् परम् 'इति' पदस्य प्रयोगः करणीय आसीत्। अर्थात् – 'समय एव बलाबलं करोति इति प्रणिगदन्त' एवम् व्यवस्थापना कार्या। किन्तु तस्य व्यत्ययोऽत्र समालोकितः। अतः अक्रमता दोषः। बलाबलम् इत्यतः परम् एव स्थितियोग्यस्य इति-शब्दस्य प्रणिगदन्त इत्यनन्तरपाठात् अक्रमतादोष इत्याशयः।

**अर्द्धान्तरैकपदता**[86]– यदि कस्यचन पद्यस्य पूर्वार्द्धगतं पदं यदि उत्तरार्धे पठ्यते, किम्वा उत्तरार्धगतं पदं पूर्वार्धे पठ्यते, तर्हि तत्र अर्द्धान्तरैकपदता इति दोषो भवति। अत एषो दोषो द्विविधः– १) पूर्वार्द्धवाक्यघटकैकपदस्य परार्द्धे पाठः, २) परार्द्धवाक्यघटकैकपदस्य पूर्वार्द्धे पाठः च। वैकल्पिकविधानराहित्यात् नित्यदोषत्वेनेयं परिगण्यते। *शिशुपालवध*महाकाव्ये अर्द्धान्तरैकपदतायाः प्रथमप्रकारः प्राप्यतेऽस्माभिः।

'यावदर्थपदां वाचमेवमादाय माधवः।
विरराम महीयांसः प्रकृत्या मितभाषिणः॥'[87] इति।

पद्येऽस्मिन् 'विरराम' इति तिङन्तं पदं पूर्वार्द्धेऽन्वयि भवति। किन्तु, परार्द्धे तस्य अभिधानात् अर्द्धान्तरैकपदता दोषः।

*शिशुपालवध*महाकाव्ये सर्गान्तरे अर्द्धान्तरैकपदतादोषयुक्ताः पद्यप्रचया विद्यन्ते।[88]

**वाच्यानभिधानता**– वाच्यस्य अवश्यं वक्तव्यस्य अनभिधानता हि वाच्यानभिधानता। 'वाच्यशब्दः' अत्र 'शब्दपरः' न तु अर्थपरः। यदि वाच्यशब्दोऽर्थपरो भवेत्, तर्हि स वाक्यदोषो न भवतीति। अतो वाच्यम्– वाचकपदातिरिक्तम् अवश्यवक्तव्यं द्योतकं, तस्य अनभिधानम्– अनुक्तं यत्र वाक्ये तद् वाक्यं वाच्यानभिधानमिति। यतोऽत्र अवश्यवक्तव्यस्य अनभिधानं भवति, अतः तदनुसन्धाने सुतरां विलम्बो जायते। एवमनुसन्धानविलम्बे रसप्रतीतौ विलम्ब इति कृत्वा दोष एव। इयं तु वाच्यानभिधानता अनित्या। *शिशुपालवधे* वाच्यानभिधानतादोषयुक्तं पद्यं यथा–

'अनुलेपनानि कुसुमान्यबलाः
कृतमन्यवः पतिषु दीपशिखाः।
समयेन तेन चिरसुप्तमनो-
भवबोधनं सममबोधिषत॥'[89] इति।

अस्य पद्यस्य पूर्वार्द्धे 'समुच्चयबोधकः च-कारः' वक्तव्य आसीत्। अर्थात्, 'तेन समयेन अनुलेपनानि कुसुमानि पतिषु कृतमन्यवः अबलाः दीपशिखाः (च)' अनेनैव प्रकारेण काव्यं कथनीयम्। किन्तु, तदत्र नोक्तः। अतः वाच्यानभिधानतादोषः। वस्तुतः 'च-कार' न वाचकम्, अपितु द्योतकम्। अतएव द्योतकपदस्यानभिधाने वाच्यानभिधानता दोष इत्याशयो साहित्यदर्पणकारस्योक्तौ प्रकटितः।[90]

*शिशुपालवधस्य* सर्गान्तरे अनेकत्र पद्येषु[91] वाच्यानभिधानतादोषः समीक्षितः।

**अर्थदोषः**– *साहित्यदर्पणे* त्रयोविंशतिधा अर्थदोषाः प्रकीर्तिताः सन्ति।[92] तन्मध्ये द्वित्रा अस्माभिः *शिशुपालवधे* प्राप्ताः।

**अपुष्टार्थत्वम्**[93]– मुख्यानुपकारित्वमपुष्टार्थत्वमिति। श्लोके योऽर्थो विवक्षितः प्रकृतप्रतिपाद्यो वा तस्य अनुपयोगित्वे अपरिपोषकत्वे अपुष्टार्थत्वं दोषो भवति। मुख्यानुपयोगिनोऽर्थस्य सन्निवेशहेत्वनुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषतैव। नित्यदोषोऽयम्।

'दारी दरदरिद्रोऽरिदारूदारोऽद्रिदूरदः।
दूरादरीद्रोऽददरद्रोदोरुद्दारुरादरी॥'[94] इति।

श्रीकृष्णस्य पराक्रममभिव्यञ्जितुं पद्यमिदमुपन्यस्तं कविना माघेन। पद्येऽस्मिन् 'दारी', अरौद्रः', दारुः' चेत्यादीनि पदानि श्रीकृष्णस्य शत्रुविदारणकर्मरूपमुख्यार्थस्यानुपकारीणि वर्तन्ते। अतोऽत्र अपुष्टार्थत्वं दोषः स्वीकरणीयः।

**पुनरुक्तत्वम्**– केनचित् शब्देन प्रतिपादितस्य अर्थस्य पुनः तद्वाचकेन पर्यायन्तरेण वा

प्रतिपादनं प्रत्यायनं वा पुनरुक्तता। अर्थात्, केनचित् शब्देन यस्यार्थस्य प्रतिपादनं कृतम्, पुनस्तस्यैव वाचकशब्देन यत्र प्रतिपादनं क्रियते तत्र पुनरुक्तत्वं दोषो भवतीति सरलार्थः। *शिशुपालवध*महाकाव्ये पुनरुक्तत्वदोषमयं पद्यं यथा–

'दधतः शशाङ्कितशशाङ्करुचि लसदुरश्छदं वपुः।
चक्रुरथ सह पुरन्ध्रिजनैरयथार्थसिद्धिं सरकं महीभृतः॥'[95] इति।

अत्र पद्ये 'शशाङ्कित-शशाङ्क' इत्यत्र पुनरुक्तता दोषः स्फुट एव। यतः शशेन अङ्कितत्वात् स चन्द्रः शशाङ्कनामा। किन्तु, पुनः शशाङ्क-पदेन तत्प्रतिपादनात् पुनरुक्तत्वं दोषः। द्वितीयवारप्रतिपादनकारणान्वेषणविलम्बात् अत्र रसप्रतीतिविलम्बः।

**रसदोषः–** *साहित्यदर्पणे* नामतः चतुर्दश रसदोषाः सूचिकाबद्धा वर्तन्ते।[96] तन्मध्ये 'स्वशब्देन रसस्योक्तिः' केवलोऽभिलक्षितोऽस्माभिरत्र।

**स्वशब्देन रसस्योक्तिः**– इयं रसदोषमध्ये[97] परिगण्यते। अभिव्यज्यमानस्य रसस्य यदि श्रृङ्गारादिना स्वशब्देन उक्तिः भवति तर्हि तत् रसदोषरूपेण परिगण्यते। *शिशुपालवध*स्य ऊनविंशतितमे सर्गे एकस्मिन् पद्ये दोषोऽयं अस्माकं नयनपदवीमागच्छति। तत्पद्यं यथा–

'धृतप्रत्यग्रश्रृङ्गाररसरागैरपि द्विपैः।
सरोषसम्भ्रमैर्बभ्रे रौद्र एव रणे रसः॥'[98] इति।

पद्येऽस्मिन् 'श्रृङ्गारः', 'रौद्रः' च रसयोः स्वशब्दोक्तेः रसदोष एव स्फुटः।

'माघकाव्यस्य काव्यदोषसमीक्षणम्' इति लघुशोधपत्रस्य समुपस्थापनं सम्प्रति समवसितम्। बृहति अस्मिन् महाकाव्ये बहुत्र पद्येषु अलङ्कारशास्त्रसम्मतान् काव्यदोषान् समीक्ष्य तेऽस्माभिः शोधपत्रे प्रदर्शिताः। उक्तदोषाणां मध्ये केचित् पदगताः, केचित् पदांशगताः, केचित् अर्थगताः च सन्ति। वाक्यगता दोषा भूयांसो लक्ष्यन्तेऽत्र। प्राप्तदोषाणां मध्ये बहवो दोषाः सन्ति ये प्रतिप्रसवात् अनित्याः, बहवः पुनः नित्याः प्रतिप्रसाभावादिति।

जगति किमपि दुष्टं वस्तु कदापि कुत्रापि वा न गृह्यते। तत् पुनः शरीरम् उत भवतु वाङ्मयं वा। योषितां शरीरं ललामितं सुन्दरञ्चापि दोषसद्भावात् न गृह्यते। तथा वाङ्मयेऽपि दोषलेशसद्भावमपि संस्कृतालङ्कारिका न स्वीकर्तुम् इच्छन्ति। भोजराजो दुष्टकाव्यस्य कारणात् कुकवित्वस्य निन्दां विरचयन् तं साक्षान्मृत्युं जगाद।[99] अतः सर्वादौ काव्ये दोषहानं विधेयम्। महाकविना माघेनापि एतत्सर्वमपि विवेकं मनसि निधाय निर्दुष्टं काव्यं रचितुं प्रचेष्टितमिति मन्यामहे। किन्तु स्खलनं गच्छत एव भवति। मृन्मयमह्यां किमपि निर्दुष्टं न सम्भवति। संसारे एतद्दृश्यते यत् रत्नं कीटानुबिद्धमपि तत् मौल्यादिकम् उत्तमाङ्गमेव भूषयति। तथा *शिशुपालवध*काव्यरूपिणा दोषलवसंस्पृष्टरत्नेन सहृदयचित्तविभूषणे का बाधास्ति? माघस्येयं शाश्वती कृतिः युगे युगे रसिकहृदयं सुधासेकेन परितृप्तं करोतीव। कदा पुनः माघस्य वाणी कान्ताया आस्यविनिसृतलास्यसरस्वतीव कर्णयोः चिरसुखं जनयतीति।

## Endnotes

1. 'गुणविपर्ययात्मनो दोषः।' - *काव्यालङ्कारसूत्रम्,* २/१/१
2. 'उद्वेगजनको दोषः सभ्यानाम्।' - *अग्निपुराणम्,* ३४७/१
3. 'काव्यस्यात्मा स एवार्थः।' – *ध्वन्यालोकः,* १/५
4. 'तेन रस एव वस्तुत आत्मा' – *ध्वन्यालोकः,* लोचनम्, १/५
5. 'अनौचित्याद्दते नान्यद्रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा।।' – *ध्वन्यालोकः* (लोचन-बालप्रियासमेतः), तृतीयोद्योतः, पृ., ३३०, पुनर्मुद्रितं संस्करणं, २०१५
6. 'मुख्यार्थहतिर्दोषः रसश्च मुख्यः' - *काव्यप्रकाशः,* सूत्रम्, ७१
7. 'स्याच्चेतो विशता येन सक्षता रमणीयता। शब्देऽर्थे च कृतोन्मेषं दोषमुद्बोधयन्ति तम्।।' - *चन्द्रालोकः,* २/१
8. 'रसस्योत्कर्षापकर्षहेतू गुणदोषौ।' - *काव्यानुशासनम्,* १/१२
9. 'दोषः काव्यापकर्षस्य हेतुः।' - *Prataparudriya of Vidyanatha with Ratnapana of Kumaraswamin,* Ed. by S. Chandrasekhara Sastrigal, Page, 213, edition, 1914.
10. 'रसापकर्षका दोषाः।' *साहित्यदर्पणः,* सम्पा. प्रो० पराशरदत्तशर्मा पराशरः, भागः – ३, पृ., २३६०
11. '...दोषा अनित्या ये।' - *ध्वन्यालोकः,* २/११
12. 'द्विविधो हि दोषः – कवेरव्युत्पत्तिकृतोऽशक्तिकृतश्च।' - *ध्वन्यालोकः* (लोचन-बालप्रियासमेतः), वृत्त्यंशः, द्वितीयोद्योतः, पृ., ३१६
13. 'विरोधिरससम्बन्धिभावा..।' - *ध्वन्यालोकः,* ३/१८
14. 'दोषाः पदानां वाक्यानां……….वाक्यार्थानां च.........।' - *सरस्वतीकरण्ठाभरणम्,* १/३
15. 'अर्थविषयं शब्दविषयं च' – *व्यक्तिविवेकः,* द्वितीयविवेकः, पृ., ३७, सम्पा. रेवाप्रसादद्विवेदी,
16. 'दुष्टं पदं' (*काव्यप्रकाशः,* सूत्रम्, ७२), 'वाक्यमेव तथा' (सूत्रम्, ७४), 'अर्थोऽपुष्टः' (सूत्रम्, ७५), 'रसे दोषाः स्युः' (सूत्रम्,८१)
17. *वाग्भटालङ्कारः,* २/६, १६, २५
18. 'शब्देऽर्थे च कृतोन्मेषं दोषम्।' - *चन्द्रालोकः,* २/१
19. 'शब्दानामपि पद-वाक्यत्वेन च द्वैविध्यम्।' - *Prataparudriya of Vidyanatha with Ratnapana of Kumaraswamin*, Ed. & Pub. by S. Chandrasekhara Sastrigal, Page, 213, 1914. 'रसभावादीनां स्वशब्दवाच्यता दुष्टा।' - तत्रैव, पृष्ठम्, २३२
20. '... ते पुनः पञ्चधा मताः। पदे तदंशे वाक्येऽर्थे सम्भवन्ति रसेऽपि यत्।।' - *साहित्यदर्पणः,* ७/१
21. *साहित्यदर्पणः,* ७/२-३
22. भामहस्य *काव्यालङ्कारे* (१/४७) 'श्रुतिदुष्टमिति' पठ्यते। *काव्यालङ्कारसूत्रौ* (२/१/६), *सरस्वतीकण्ठाभरणे* (१/८) च 'कष्टमिति' पठ्यते। मम्मटस्य *काव्यप्रकाशे* , जयदेवस्य *चन्द्रालोके* (२/२), *वाग्भटालङ्कारे* (२/८) च 'श्रुतिकटु' इत्याम्नायते।
23. *साहित्यदर्पणः,* सप्तमपरिच्छेदः, सम्पा. योगेश्वरदत्तशर्मा पाराशरः, पृष्ठम्, २३२०
24. 'दोषाः सन्त्येते पदस्यांशेऽपि केचन।' – *काव्यप्रकाशः,* सूत्रम्, ४७

25. *शिशुपालवधम्*, ११/२८
26. *शिशुपालवधम्*, ११/३६
27. वामनीये *काव्यालङ्कारसूत्रे* (२/१/१०) 'अश्लीलत्वं' 'पदार्थदोषे', *सरस्वतीकण्ठाभरणे* (१/४४-४६) च 'वाक्यार्थदोषे' पठ्यते। 'अश्लीलमिति निर्दिष्टमश्लीलार्थप्रतीतिकृत्' (१/५३) इति भोजराजस्याभिप्रायः।
28. *काव्यप्रकाशे* त्रिविधाश्लीलत्वप्रसङ्गो प्राप्यते – 'अश्लीलत्वं त्रिधेति व्रीडा-जुगुप्सामङ्गलव्यञ्जकत्वात्।' *काव्यप्रकाशः* (बालबोधिनीसमेतः), पृष्ठम्, २७७। 'अश्लीलं त्रिविधं व्रीडा-जुगुप्सामङ्गलात्मना' – *चन्द्रालोकः*, २/८
29. शिशुपालवधम्, १४/५३
30. 'अश्लीलत्वं त्वसभ्यस्मृतिहेतुत्वमेव।' - *साहित्यदर्पणः*, विमलाटीका, सम्पा. योगेश्वरदत्तशर्मा पाराशरः, पृ., २३२५, भागः - ३
31. इदं *काव्यप्रकाशे* – 'अवाचकम्' (सूत्रम्, ७२) इति पठ्यते। *चन्द्रालोके* 'अवाचकम्' (२/६) इति परिलोक्यते।
32. *साहित्यदर्पणः*, लक्ष्मीटीका, सम्पा. कृष्णमोहनशास्त्री, पृष्ठम्, ४७७, पुनर्मुद्रितं संस्करणम्, २००७
33. *शिशुपालवधम्*, १/१६
34. ३/२१, ११/१ इत्यादिषु पद्येषु।
35. केचिदाहुः 'विधेयविमर्शता' इति।
36. *साहित्यदर्पणः*, सम्पा. योगेश्वरदत्तशर्मा पाराशरः, पृ., २३६०, भागः- ३
37. *शिशुपालवधम्*, ७/१०
38. 'दोषाः केचिद्भवन्त्येषः पदांशेऽपि पदे परे।' – *साहित्यदर्पणः*, ७/४
39. *शिशुपालवधम्*, ३/७३
40. तत्रैव, ११/२५
41. *काव्यालङ्कारे* (१/३८) नेयार्थं प्राप्यते। *काव्यालङ्कारसूत्रे* (२/१/१२) नेयार्थं पदार्थदोषत्वेन गण्यते। *सरस्वतीकण्ठाभरणे* (१/१२), *चन्द्रालोके* (२/११) नेयार्थत्वं पददोषे पठ्यते। *वाग्भटालङ्कारे* (२/११) 'स्वसङ्केतप्रक्लृप्तार्थम्' इति आम्नायते।
42. 'दोषाः केचिद्भवन्त्येषः पदांशेऽपि पदे परे।' – *साहित्यदर्पणः*, ७/४
43. *साहित्यदर्पणः*, सप्तमपरिच्छेदः, पृ., २३४३
44. *शिशुपालवधम्*, ३/१
45. तत्रैव, १५/५६
46. *साहित्यदर्पणः*, ७/५-८
47. 'अविमृष्टविधेयांशो भावश्च पद-वाक्ययोः।' – *साहित्यदर्पणः*, ७/३ (उत्तरार्धः)
48. *शिशुपालवधम्*, ११/५७
49. 'पतत्प्रकर्षो हीनानुप्रासादित्वे यथोत्तरम्।' – *चन्द्रालोकः*, २/२०
50. *साहित्यदर्पणः*, विमलाटीका, सम्पा. योगेश्वरदत्तशर्मा पाराशरः, पृ., २४९०, भागः - ३
51. *शिशुपालवधम्*, १/२४

52. 'वर्णसाम्यमनुप्रासः' – *काव्यप्रकाशः*, सूत्रम्, १०४
53. कथितं पुनरुक्ता वाक्' – *चन्द्रालोकः*, २/१९ (प्रथमार्धः)
54. 'एतच्च कवेरशक्तिं प्रकाशयत् किमपि वैरस्यमावहति।' – *काव्यप्रकाशः*, दीपिका टीका, पृ., २०२, सरस्वतीभवन-ग्रन्थमाला -४६, द्वितीयसंस्करणम्, १९९१
55. *शिशुपालवधम्*, ५/१८
56. ६/५०, ५४, १३/२१
57. *काव्यालङ्कारे* (४/२०), *काव्यादर्शे* (३/१४४) , *काव्यालङ्कारसूत्रे* (२/२/२२) इयं 'अपक्रमम्' इति पठ्यते। *सरस्वतीकण्ठाभरणे* (१/२१) 'क्रमभ्रष्टम्' इति आम्नातमस्ति।
58. 'निरुक्ता प्रकृतिर्द्वेधा नाम धातुप्रभेदः' - *वङ्गीय शब्दकोषः*, सम्पा. हरिचरणबन्द्योपाध्यायः, द्वितीयो भागः, पृष्ठम्, १३६९, अष्टममुद्रणम्, २०११
59. *शिशुपालवधम्*, २/२३
60. तत्रैव, २/२४
61. तत्रैव, ३/८२ (पूर्वार्धः)।
62. ४/२२, ११/६४, १२/३३, १२/६०, ७२, १३/१०, १४/४९, १८/२ प्रभृतिषु पद्येषु।
63. *शिशुपालवधम्*, २/३७
64. *शिशुपालवधम्*, ६/३०, ८/५५, १०/२२, ११/१, १९/२० प्रभृतिषु पद्येषु।
65. तत्रैव, १/४५
66. तत्रैव, १/६६
67. तत्रैव, ८/६१
68. तत्रैव, १३/६१
69. तत्रैव, १६/२६
70. 'कोप-क्रोधामर्ष-रोष-प्रतिघा रुड्क्रुधौ स्त्रियौ।' – *अमरकोषः*, सुधाव्याख्यासहितः, व्रजजीवन प्राच्यभारती ग्रन्थमाला – १, पृष्ठम्, ८२, पुनर्मुद्रितं संस्करणम्, २०१३
71. *काव्यालङ्कारे* (२/४५), *सरस्वतीकण्ठाभरणे* (१/२६), *काव्यप्रकाशे* सप्तमोल्लासे, *चन्द्रालोके* (२/१८) च प्राप्यते।
72. *शिशुपालवधम्*, ८/१७
73. भामहस्य *काव्यालङ्कारे* (२/५३), *काव्यप्रकाशे* सप्तमोल्लासे, *चन्द्रालोके* (२/१८) च आलोच्यते।
74. *शिशुपालवधम्*, ३/६२
75. ८/६१, ९/७, १६/२३
76. *शिशुपालवधम्*, १२/७२
77. *सरस्वतीकण्ठाभरणे* (२/२४), *चन्द्रालोके* (२/२६) च प्राप्यते। *वाग्भटालङ्कारे* (२/१७) 'खण्डितम्' इति पठ्यते।
78. 'वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता।' – *साहित्यदर्पणः*, सप्तमपरिच्छेदः, सम्पा. योगेश्वरदत्तशर्मा पाराशरः, पृ., २५४८, भागः- ३, प्रथमं संस्करणम्, २०००
79. 'गर्भितं यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति' – *काव्यप्रकाशः*, वृत्त्यंशः, सूत्रम्, १७

80. *शिशुपालवधम्*, ५/३२
81. *काव्यप्रकाशस्य* सप्तमोल्लासे 'समाप्तपुनरात्तम्' इति पठ्यते। *चन्द्रालोके* (२/२१), *प्रतापरूद्रीये* दोषप्रकरणे च दोषोऽयमालोचितोऽस्ति।
82. *शिशुपालवधम्*, ३/५०
83. ४/५६, १२/३८, ४८, ५१, ७१, ७३, १३/२४, १४/५२, १५/४१, २०/६७ इत्यादिषु पद्येषु।
84. *काव्यप्रकाशे* सप्तमोल्लास इयं पठ्यते।
85. *शिशुपालवधम्*, ६/४४
86. *काव्यप्रकाशे चन्द्रालोके* चेयं वाक्यदोषमध्ये गण्यते।
87. *शिशुपालवधम्*, २/१३
88. तत्रैव, ११/२६, १५/१८, ४६
89. *शिशुपालवधम्*, ९/२४
90. '..न्यूनपदत्वे वाचकस्यैव न्यूनता विवक्षिता। अपेः तु न तथात्वम्..।' – *साहित्यदर्पणः*, सप्तमपरिच्छेदः, सम्पा. योगेश्वरदत्त- शर्मा पाराशरः, पृष्ठम्, २४१८, भागः – ३, प्रथमं संस्करणम्, २०००
91. ६/३०, १०/२२
92. *साहित्यदर्पणः*, ७/९-१२ (पूर्वार्धः)
93. इदं *काव्यप्रकाशे, चन्द्रालोके* (२/२९) च पठ्यते।
94. *शिशुपालवधम्*, १९/१०६
95. तत्रैव, १५/८०
96. *साहित्यदर्पणः*, ७/१२-१५
97. 'व्यभिचारिरसस्थायिभावानां शब्दवाच्यता...रसे दोषाः स्युरीदृशाः।' – *काव्यप्रकाशः*, सूत्रम्, ८१. 'रसस्योक्तिः स्वशब्देन...दोषो रसगता मताः' – *साहित्यदर्पणः*, सप्तमपरिच्छेदः, सम्पा. प्रो० योगेश्वरदत्तशर्मा पाराशरः, पृ., २६२२, प्रथमसंस्करणं, २०००। *प्रतापरुद्रीये* - 'रसभावादीनां स्वशब्दवाच्यता दुष्टा।' *Prataparudriya of of Vidyanatha with Ratnapana of Kumarasvamin son of Mallinatha*. Ed. & pub. by S. Chandrasekhara Sastrigal. Page, 222
98. *शिशुपालवधम्*, १९/३७
99. 'कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः' – *शृङ्गारप्रकाशः*, ९/१

## Bibliography


- आनन्दवर्धनः. *ध्वन्यालोकः*. लोचन-बालप्रियासमेतः. संशोधकः पण्डित-पट्टाभिरामशास्त्री. वाराणसीः चौखम्भा संस्कृत संस्थान, २०१५. (पुनर्मुद्रितं संस्करणम्). (काशी संस्कृत ग्रन्थमाला – १३४)
- बन्द्योपाध्यायः, हरिचरण. *वङ्गीय शब्दकोष*. भागः (१-२). कलकाताः साहित्य अकादेमि, २०११. (अष्टममुद्रणम्; १३४०-१३५३)

- भरतः. *नाट्यशास्त्रम्.* अभिनवभारतीटीकोपेतम्. भागः (१-४). सम्पा. रविशङ्करनागरः के० एल० जोशी च. दिल्ली: परिमल पब्लिकेशन्स, २०१२. (चतुर्थं पुनर्मुद्रणम्)
- भामहः. *काव्यालङ्कारः.* उद्यानवृत्तिसमेतः. श्रीपञ्चनदस्थ-श्रीनिवासमुद्रणालये मुद्रितः, १९३४
- भोजः. *सरस्वतीकण्ठाभरणम्.* रत्नेशरकृतरत्नदर्पणटीकासमेतः. भागः (१). व्याख्याता. डाँ. कामेश्वरनाथः. दिल्ली: चौखम्भा ओरियन्टालिया, २००६. (द्वितीयं संस्करणम्)
- मम्मटः. *काव्यप्रकाशः.* प्रदीपोद्योतसमेतः. संशोधकः वासुदेवशास्त्री अभ्यङ्करः. वाराणसी: चौखम्बा विद्याभवन, १९९४. (द्वितीयं संस्करणम्). (विद्याभवन प्राच्यविद्या ग्रन्थमाला – ५९)
- _______. _________. दीपिकाव्याख्यासमेतः. सम्पा. आचार्यश्रीरामगोविन्दशुक्लः. वाराणसी: सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९१. (द्वितीयं संस्करणम्)
- _______. _________. बालबोधिनीटीकोपेतः. दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०१३. (व्रजजीवन प्राच्यभारती ग्रन्थमाला – १६८)
- महिमभट्टः. *व्यक्तिविवेकः.* रुय्यककृतव्याख्योपेतः. वाराणसी: चौखम्बा संस्कृत सीरिज ऑफिस, (प्रकाशकालोऽनुल्लिखितः). (काशी संस्कृत सीरीज १२१)
- माघः. *शिशुपालवधम्.* सर्वङ्कषा-माधुरीटीकोपेतम्. कलकाता: संस्कृत बुक डिपो, २०१५. (प्रथमप्रकाशः)
- _______. _________. सर्वङ्कषा-मणिप्रभाव्याख्योपेतम्. व्याख्याता. हरगोविन्दशास्त्री. वाराणसी: चौखम्बा विद्याभवन, २०१३. (पुनर्मुद्रितं संस्करणम्). (विद्याभवन संस्कृत ग्रन्थमाला – ८)
- वामनः. *काव्यालङ्कारसूत्रवृत्तिः.* कामधेनुव्याख्योपेता. प्रकाशकौ पण्डितश्रीआशुबोधविद्याभूषण-श्रीनित्यबोधविद्यारत्नौ. कलिकातामहानगरी (अधुना कलकाता): वाचस्पतियन्त्रे मुद्रिता, १९२२. (तृतीयं संस्करणम्)
- ________. *काव्यालंकारसूत्राणि* (वृत्तिसमेतानि). १९२६. (तृतीयं संस्करणम्). (काव्यमाला. १५)
- विश्वनाथः. साहित्यदर्पणः. कुमुमप्रतिमाटीकोपेतः. सम्पा. श्रीहरिदाससिद्धान्तवागीशभट्टाचार्यः. कलिकाता (अधुना कलकाता): संस्कृत बुक डिपो (प्रा) लि. १९८१
- विश्वनाथः. *साहित्यदर्पणः.* लक्ष्मीटीकोपेतः. सम्पा. श्रीकृष्णमोहनशास्त्री. वाराणसी: चौखम्भा संस्कृत संस्थान, २००७. (काशी संस्कृत ग्रन्थमाला – १४५)
- _______. ________. विवृति-विवृतिपूर्ति-विज्ञप्रिया-लोचन-कुसुमप्रतिमा-विमला-लक्ष्मी-रुचिराटीकोपतः. भागः (१-४). सम्पा. प्रो० योगेश्वरदत्तशर्मा पाराशरः. दिल्ली: नाग पब्लिशर्स, १९९९. (प्रथमं संस्करणम्)
- _______. _________. लोचन-विज्ञप्रियासमेतः. सम्पा. करुणाकरशर्मा. मोतीलाल बनारसीदास, १९३८
- वेदव्यासः. *अग्निपुराणम्.* मूलेन वङ्गानुवादेन च समेतम्. सम्पा. पञ्चाननतर्करत्नः. कलकाता: नवभारत पाब्लिशर्स, १४१९. (द्वितीयं संस्करणम्; १९९९)
- Jha, Bechan. *Concept of Potic Blemish in Sanskrit.* Varanasi: Chowkhamba Sanskrit Series Office, (The Chowkhamba Sanskrit Studies Vol. – xlvii).

- *Kāvyādarśaḥ of Daṇḍin.* Ed. with comm. of Jīvānanda Vidyāsāgar & Eng. Trans. of V.V. Sastrulu by R.K. Panda. Delhi: Bharatiya Kala Prakashan, 2008. (Revised ed.).
- *Kāvyālaṅkāra of Rudraṭa with the Sanskrit Commentary of Namisādhu.* Ed. with Prakāśa Hind. Comm. by Paṇḍita Rāmadeva Śukla. Varanasi: Chowkhamba Vidyabhawan, 2014.
- *Maharaja Bhojaraja's Sringara Prakash.* Vol. (2). (Prakash 9-14). Ed. by G.R. Josyer. Mysore: Coronation Press, 1963
- *Prataparudriya of of Vidyanatha with Ratnapana of Kumarasvamin son of Mallinatha*. Ed. & pub. by S. Chandrasekhara Sastrigal. Madrass (Now Chennai): Sri Balamanorama Press, 1914 (Sri Balamanorama Series No. 3)
- *The Candrāloka of Jayadeva with the Rākāgama Commentary by Śrī Gāgā Bhaṭṭa*. Ed. by Pandit Ananta Ram Shastri Vetal. Benāras (Now Varanasi): The Chowkhamba Sanskrit Series Office, 1938.
- *The Kāvyānuśāsana of Hemachandra with his own gloss*. Ed. by Mahāmahopādhyāya Paṇdita Śivadatta & Kāśīnātha Pāṇdurang Parab. Bombay (Now Mumbai): Nirṇay-sāgara Press, 1934. (Kāvyamāla – 70).
- *The Nāmaliṅgānuśāsana of Amarasiṃha with the Commentary of Kṣīrasvāmin.* Ed. by Krishnaji Govinda oka. Poona (Now Pune): 1913.
- *The Śiśupalavadha by the Mahākavi Māgha.* With two comm. sandeha-viṣauṣadhi by Vallabhadeva and sarvaṅkaṣā by Mallinātha. Ed. by Anantarāma Śāstrī Vetāla. Benares City (Now Varanasi): 1985. (Haridas Sanskrit Granthamālā, No. 69).


——